# श्रीमद्भगवद्गीता

# Śrīmad-Bhagavad-gītā

# The Song of the Lord

# Chapter Fifteen

with the comms. of Śrīdhara, Viśvanātha, and Baladeva

Version 0.1

March 28, 2001

# Chapter 15

# अथ पञ्चदशोऽध्यायः

श्रीभगवान् उवाच
ऊर्ध्वमूलम् अधःशाखम् अश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१ ॥

श्रीधरः

वैराग्येण विना ज्ञानं न च भक्तिरतः स्फुटम् ।
वैराग्योपस्कृतं ज्ञानम् ईशः पञ्चदशेऽदिशत् ॥

पूर्वाध्यान्ते मां च योऽव्यभिचारेण भक्तियोगेन सेवते इत्य् आदिना परमेश्वरम् एकान्तभक्त्या भजतस् तत्प्रसादलब्धज्ञानेन ब्रह्मभावो भवतीत्युक्तम् । न चैकान्तभक्तिः ज्ञानं चाविरक्तस्य सम्भवतीति वैराग्यपूर्वकं ज्ञानम् उपदेष्टुकामः प्रथमं तावत् सार्धश्लोकाभ्यां संसारस्वरूपं वृक्षरूपकालङ्कारेण वर्णयन् भगवान् उवाच ऊर्ध्वमूलम् इति । ऊर्ध्वम् उत्तमः क्षराक्षराभ्याम् उत्कृष्टः पुरुषोत्तमो मूलं यस्य तम् । अध इति ततोऽर्वाचीनां कार्योपाधयो हिरण्यगर्भादयो गृह्यन्ते । ते तु शाखा इव शाखा यस्य तम् । विनश्वरत्वेन श्वः प्रभातपर्यन्तम् अपि न स्थास्यतीति विश्वासानर्हत्वाद् अश्वत्थं प्राहुः । प्रवाहरूपेणाविच्छेदाद् अव्ययं च प्राहुः । ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातन इत्याद्याः श्रुतयः । छन्दांसि वेदा यस्य पर्णानि धर्माधर्मप्रतिपादनद्वारेण च्छायास्थानीयैः कर्मफलैः संसारवृक्षस्य सर्वजीवाश्रयणीयत्वप्रतिपादनात् पर्णस्थानीया वेदाः । यस्तम् एवम्भूतम् अश्वत्थं वेद स एव वेदार्थवित् । संसारप्रपञ्चवृक्षस्य मूलम् ईश्वरः । ब्रह्मादयस् तदंशाः शाखास्थानीयाः । स च संसारवृक्सो विनश्वरः

।प्रवाहरूपेण नित्यश्च ।वेदोक्तैः कर्मभिः सेव्यताम् आपादितश्च इत्येतावान् एव हि वेदार्थः ।अत एवं विद्वान् वेदविद् इति स्तूयते ॥१ ॥

**विश्वनाथ**:

संसारच्छेदकोऽसङ्ग आत्मेशांशः क्षराक्षरात् ।
उत्तमः पुरुषः कृष्ण इति पञ्चदशे कथा ॥

पूर्वाध्याये

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ इत्युक्तम् ।

तत्र तव मनुष्यस्य भक्तियोगेन कथं ब्रह्मभाव इति चेत्, सत्यम् अहं मनुष्य एव किन्तु ब्रह्मणोऽपि तस्य प्रतिष्ठा परमाश्रय इत्यस्य सूत्ररूपस्य वृत्तिस्थानीयोऽयं पञ्चदशाध्याय आरभ्यते । तत्र स गुणान् समतीत्य इत्युक्तम् इति गुणम्योऽयं संसारः कः, कुतो वायं प्रवृत्तस् तद्भक्त्या संसारम् अतिक्राम्यन् जीवो वा कः । ब्रह्मभूयाय कल्पते इत्युक्तं ब्रह्म वा किं ।ब्रह्मणः प्रतिष्ठा त्वं वा क इत्याद्यपेक्षायां प्रथमम् अतिशयोक्त्यलङ्कारेण संसारोऽयम् अद्भुतोऽश्वत्थवृक्ष इति वर्णयति ।ऊर्ध्वे सर्वलोकोपरितले सत्यलोके प्रकृतिबीजोत्थप्रथमप्ररोहरूपमहत्तत्त्वात्मकश्चतुर्मुख एक एव मूलं यस्य तम् ।अधः स्वर्भुवोर्भूलोकेषु अनन्ता देवगन्धर्वकिन्नरासुरराक्षसप्रेतभूतमनुष्यगवाश्वादिपशुपक्षिकृमिकीटपतङ्गस्थावरास् ताः शाखा यस्य तम् अश्वत्थं धर्मादिचतुर्वर्गसाधकत्वाद् अश्वत्थम् उत्तमं वृक्षम् ।श्लेषेण भक्तिमतां न श्वः स्थास्यतीत्यश्वत्थं नष्टप्रायम् इत्यर्थः ।अभक्तानां त्वव्ययम् अनश्वरम् ।छन्दांसि वायव्यं श्वेतम् आलभेत भूमिकाम् ऐन्द्रम् एकादशकपालं निर्वपेत् प्रजाकामः इत्याद्याः कर्मप्रतिपादका वेदाः संसारवर्धकत्वात् पर्णानि ।वृक्षो हि पर्णैः शोभते ।यस्तं जानाति स वेदज्ञः ।तथा च ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः इति कठवल्लीश्रुतिः ॥१ ॥

**बलदेव**:

संसारच्छेदि वैराग्यं जीवो मेऽंशः सनातनः ।
अहं सर्वोत्तमः श्रीमान् इति पञ्चदशे स्मृतम् ॥

पूर्वत्र विज्ञानानन्दस्यौत्पत्तिकगुणाष्टकस्यापि जीवस्य कर्मरूपानादिवासनानुगुणेन भगवत्सङ्कल्पेन प्रकृतिगुणसङ्गः । स च बहुविधस्तदत्ययश्च भगवद्भक्तिशिरस्केन विवेकज्ञानेन भवेत् तस्मिंश्च सति सम्प्राप्तनिजस्वरूपो जीवो भगवन्तम् आश्रित्य प्रमोदो सर्वदा तस्मिंस्तिष्ठतीत्युक्तम् । अथ तद्विवेकज्ञानस्थैर्यकरं वैराग्यं जीवस्य भजनीयभगवदंशत्वं भगवतः स्वेतरसर्वोत्तमत्वं चोक्तेष्वर्थेषूपयोगाय पञ्चदशेऽस्मिन् वर्ण्यते । तत्र तावद् गुणविरचितस्य संसारस्य वैराग्यवैच्छेद्यत्वात् संसारं वृक्षत्वेन वैराग्यं च शस्त्रत्वेन रूपयन् वर्णयति भगवान् ऊर्ध्वमूलम् इत्यादिभिस् त्रिभिः ।

संसाररूपम् अश्वत्थम् ऊर्ध्वमूलम् अधःशाखं प्राहुः । ऊर्ध्वं सर्वोपरिसत्यलोके प्रधानबीजोत्थप्रथमप्ररोहरूपमहत्तत्त्वात्मकचतुर्मुखरूपं मूलं यस्य सः । अधः सत्यलोकाद् अर्वाचीनेषु स्वर्भुवर्भूर्लोकेषु देवगन्धर्वकिन्नरासुरयक्षराक्षसमनुष्यपशुपक्षिकीटपतङ्गस्थावरान्ता नानादिक्प्रसृतत्वाच् छाखा यस्य तम् । चतुर्वर्गफलाश्रयत्वाद् अश्वत्थम् उत्तमवृक्षम् । तादृशेन विवेकज्ञानेन विना निवृत्तेरभावाद् अव्ययं प्रवाहरूपेण नित्यं च । तम् आहुः श्रुतयश्चात्र

ऊर्ध्वमूलोऽवाक्शाख
एषोऽश्वत्थः सनातनः ।
ऊर्ध्वमूलम् अर्वाक्शाखं
वृक्षं यो वेद सम्प्रति ॥ (कठ उ. २.३.१) इत्यादिकाः ।

यस्य संसाराश्वत्थस्य छन्दांसि कर्माकर्मप्रतिपादकानि श्रुतिवाक्यानि वासनाआरूपतन्निदानवर्धकत्वात् पर्णानि प्राहुस्तानि च्छन्दांसि वायव्यं श्वेतम् आलभेत भूतिकाम ऐन्द्रम् एकादशकपालं निर्वपेत् प्रजाकामः इत्यादीनि बोध्यानि । पत्रैस्तरुर्वर्धते शोभते च तम् अश्वत्थं यो वेद यथोक्तं जानाति स एव वेदवित् । वेदः खलु संसारस्य वृक्षत्वं छेद्यत्वाभिप्रायेणाह तद्छेदनोपायज्ञो वेदार्थविद् इति भावः ॥१ ॥

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा**
**गुणप्रवृद्धा विषयप्रवालाः ।**
**अधश्च मूलान्यनुसंततानि**
**कर्मानुबन्धीनि मनुष्यलोके ॥२ ॥**

**श्रीधरः**: किं च अधश्चेति । हिरण्यगर्भादयः कार्योपाधयो जीवाः शाखास्थानीयत्वेनोक्ताः । तेषु च ये दुष्कृतिनस्तेऽधः पश्वादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य शाखाः । किं च गुणैः सत्त्वादिवृत्तिभिर् जलसेचनैरिव यथायथं प्रवृद्धा वृद्धिं

प्राप्ताः । किं च विषया रूपादयः प्रवालाः पल्लवस्थानीया यासां ताः । शाखाग्रस्थानीयाभिरिन्द्रियवृत्तिभिः संयुक्तत्वात् । किं च अधश्च च शब्दाद् ऊर्ध्वं च । मूलान्यनुसन्ततानि विरूढानि । मुख्यं मूलम् ईश्वर एव । इमानि त्वन्तरालानि मूलानि तत्तद्भोगवासनालक्षणानि । तेषां कार्यम् आह मनुष्यलोके कर्मानुबन्धीनीति । कर्मैवानुबन्ध्युत्तरकालभावि येषां तानि । ऊर्ध्वाधोलोकेषूपभुक्ततत्तद्भोगवासनादिभिर् हि कर्मक्षये मनुष्यलोकं प्राप्तानां तत्तदनुरूपेषु कर्मसु प्रवृत्तिर्भवति । तस्मिन्न् एव हि कर्माधिकारो नान्येषु लोकेषु । अतो मनुष्यलोक इत्युक्तम् ॥ २ ॥

**विश्वनाथ**: अधः पश्वादियोनिषु ऊर्ध्वे देवादियोनिषु प्रसृतास्तस्य संसारवृक्षस्य गुणैः सत्त्वादिवृत्तिभिर्जलसेकैरिव प्रवृद्धाः । विषया शब्दादयः प्रवालाः पल्लवस्थानीया यासां ताः । किं च तस्य मूले सर्वलोकैरलक्षितो महानिधिः कश्चिद् अस्तीत्यनुमीयते यम् एव मूलजटाभिरवलम्ब्य स्थितस्य तस्याश्वत्थवृक्षस्यापि बटवृक्षस्येव शाखास्वपि बाह्या जटाः सन्तीत्याह अधश्चेति । ब्रह्मलोकमूलस्यापि तस्याधश् च मनुष्यलोके कर्मानुबन्धीनि कर्मानुलम्बीनि मूलान्यनुसन्ततानि निरन्तरं विस्तृतानि भवन्ति । कर्मफलानां यतस्ततो भोगान्ते पुनर्मनुष्यजन्मन्येव कर्मसु प्रवृत्तानि भवन्तीत्यर्थः ॥ २ ॥

**बलदेव**: किं चाध इति । तस्योक्तलक्षणस्य संसाराश्वत्थस्य शाखा अध ऊर्ध्वं च प्रसृताः । अधो मनुष्यपश्वादियोनिषु दुष्कृतैरूर्ध्वं च देवगन्धर्वादियोनिषु सुकृतैर्विस्तृताः । गुणैः सत्त्वादिवृत्तिभिरम्बुनिषेकैरिव प्रवृद्धाः स्थौल्यभाजः । विषयाः शब्दस्पर्शादयः प्रवालाः पल्लवा यासां ताः । शाखाग्रस्थानीयाभिः श्रोत्रादिवृत्तिभिर्योगाद् रागाधिष्ठानत्वाच् च शब्दादीनां पल्लवस्थानीयत्वम् ।

तस्याश्वत्थस्याधश्च शब्दाद् ऊर्ध्वं चावान्तराणि मूलान्यनुसन्ततानि विस्तृतानि सन्ति । तानि च तत्तद्भोगजनितरागद्वेषादिवासनारूपाणि धर्माधर्मप्रवृत्तिकारित्वान् मूलतुल्यान्युच्यन्ते । मुख्यं मूलं तादृक् चतुर्मुखस्तत्तद्वासनास्त्ववान्तरमूलानि न्यग्रोधस्यैव जटोपजटावृन्दानीति भावः । तानि कीदृशानीत्याह मनुष्यलोके कर्मानुबन्धीनि यतस्ततः कर्मफलभोगावसाने सति पुनर्मनुष्यलोके कर्महेतुभूतानि भवन्तीत्यर्थः । स लोकः खलु कर्मभूमिरिति प्रसिद्धम् ॥ २ ॥

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलम्
असङ्गशस्त्रेण दृढेन छित्त्वा ॥ ३ ॥

ततः पदं तत्परिमार्गितव्यं
यस्मिन् गता न निवर्तन्ति भूयः ।

तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥

**श्रीधर**: किं च न रूपम् इति । इह संसारे स्थितैः प्राणिभिरस्य संसारवृक्षस्य तथोर्ध्वमूलत्वादिप्रकारेण रूपं नोपलभ्यते । न चान्तोऽवसानम् अपर्यन्तत्वात् । न चादिरनादित्वात् । न च सम्प्रतिष्ठा स्थितिः । कथं तिष्ठतीति नोपलभ्यते । यस्माद् एवम्भूतोऽयं संसारवृक्षो दुरुच्छेदोऽनर्थकरश्च तस्माद् एनं दृढेन वैराग्येन शस्त्रेण च्छित्वा तत्त्वज्ञाने यतेतेत्याह अश्वत्थम् एनम् इति सार्धेन । एनम् अश्वत्थं सुविरूढमूलम् अत्यन्तबद्धमूलं सन्तम् । असङ्गः सङ्गराहित्यम् अहंममतात्यागः । तेन शस्त्रेण दृढेन सम्यग्विचारेण च्छित्त्वा पृथक्कृत्य ॥ ३ ॥

तत इति । ततश्तस्य मूलभूतं तत् पदं वस्तु परिमार्गितव्यम् अन्वेष्टव्यं । कीदृशं, यस्मिन् गता यत् पदं प्राप्ताः सन्तो भूयो न निवर्तन्ति । नावर्तते इत्याथः । अन्वेषणप्रकारम् एवाह तम् एवेति । यत एषा पुराणी चिरन्तनी संसारप्रवृत्तिः प्रसृता विस्तृता । तम् एव चाद्यं पुरुषं प्रपद्ये शरणं व्रजामि । इत्येवम् एकान्तभक्त्यान्वेष्टव्यम् इत्यर्थः ॥ ४ ॥

**विश्वनाथ**: किं चेह मनुष्यलोकेऽस्य रूपं स्वरूपं तथा सनिश्चयं नोपलभ्यते सत्योऽयं मिथ्यायं नित्योऽयम् इति वादिमतवैविध्याद् इति भावः । न चान्तोऽपर्यन्तत्वान् न चादिरनादित्वान् न च सम्प्रतिष्ठाश्रयः । किं वाधारः कोऽयम् इत्यपि नोपलभ्यते तत्त्वज्ञानाभावाद् इति भावः । यथा तथायं भवतु जीवमात्रदुःखैकनिदानस्यास्य छेदकं शस्त्रम् असङ्गं ज्ञात्वा तेनैतं छित्त्वैवास्य मूलतलस्थो महानिधिर् अन्वेष्टव्य इत्याह अश्वत्थम् इति । असङ्गोऽनासक्तिः सर्वत्र वैराग्यम् इति यावत् तेन शस्त्रेण कुठारेण च्छित्वा स्वतः पृथक्कृत्य ततस्तस्य मूलभूतं तत्पदं वस्तु महानिधिरूपं ब्रह्म परिमार्गितव्यम् । कीदृशं तद् अत आह यस्मिन् गता यत् पदं प्राप्ताः सन्तो भूयो न निवर्तन्ते न चावर्तन्त इत्यर्थः । अन्वेषणप्रकारम् आह यत एषा पुराणी चिरन्तनी संसारप्रवृत्तिः प्रसृता विस्तृता तम् एवाद्यं पुरुषं प्रपद्ये भजामीति भक्त्या अन्वेष्टव्यम् इत्यर्थः ॥ ३-४ ॥

**बलदेव**: न रूपम् इति अस्याश्वत्थस्य रूपम् इह मनुष्यलोके तथा नोपलभ्यते यथोर्ध्वमूलत्वादिधर्मकतया मयोपवर्णितम् । न चास्यान्तो नाश उपललभ्यते । कथम् अयं अनर्थव्रातजटिलो विनश्येद् इति न ज्ञायते । न चास्यादिकारणम् उपलभ्यते । कुतोऽयम् ईदृशो जातोऽस्तीति । न चास्य सम्प्रतिष्ठा समाश्रयोऽप्युपलभ्यते । किं समाश्रयोऽयं सतिष्ठत् इति ।

किन्तु मनुस्योऽहं पुत्रो यज्ञदत्तस्य पिता च देवदत्तस्य, तदनुरूपकर्मकारी सुखी दुःखी, सास्मिन् देशेऽस्मिन् ग्रामे निवसामीत्येतावद् एव विज्ञायत इत्यर्थः । यस्माद्

एवं दुर्बोधोऽनर्थव्रते हेतुश्चायम् अश्वत्थस्तस्मात् सत्प्रसङ्गलब्धवस्तुयाथात्म्यज्ञानेनैनम् असङ्गशस्त्रेण वैराग्यकुठारेण दृढेन विवेकाभ्यासनिशितेन च्छित्वा स्वतः पृथक्कृत्य तत् पदं परिमार्गितव्यम् इति परेणान्वयः । सङ्गो विषयाभिलाषस्तद्विरोध्यसङ्गो वैराग्यं, तद् एव शस्त्रं तदभिलाषनाशकत्वात् सुविरूढमूलं पूर्वोक्तरीत्यात्यन्तं बद्ध-मूलम् । ततः संसाराश्वत्थमूलाद् उपरिस्थितं तत् पदं परिमार्गितव्यं मत्प्रसङ्गलब्धैः श्रवणादिभिः साधनैरन्वेष्टव्यम् ।

तत् पदं कीदृशं तत्राह यस्मिन्न् इति । यस्मिन् गतास्तैः साधनैर्यत् प्राप्ता जना-स्ततो न निवर्तन्ते स्वर्गाद् इव न पतन्ति । मार्गणविधिम् आह तम् एवेति । यतः पुराणी चिरन्तनीयं जगत्प्रवृत्तिः प्रसृता विस्तृता । तम् एव चाद्यं पुरुषं प्रपद्ये शरणं व्रजामीति प्रपत्तिपूर्वकैः श्रवणादिभिस्तन्मार्गणम् उक्तम् । यो जगद्धेतुर्यत्पोरपत्त्या संसारनिवृत्तिः स खलु कृष्ण एव अहं सर्वस्य प्रभवः इत्यादेः । दैवी ह्येषा गुणमयी इत्यादेश्च तदुक्तेः । न तद् भासयत इत्यादिना व्यक्तीभावित्वाच् च ॥ ३-४ ॥

**निर्मानमोहा जितसङ्गदोषा**
**अध्यात्मनित्या विनिवृत्तकामाः ।**
**द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्**
**गच्छन्त्यमूढाः पदम् अव्ययं तत् ॥ ५ ॥**

**श्रीधरः** तत्प्राप्तौ साधनान्तराणि दर्शयन्न् आह निर्मानेति । निर्गतौ मानमोहौ अहङ्कारमिथ्यातिसिवेशौ येभ्यस् ते । जितः पुत्रादिसङ्गरूपो दोषो यैस्ते । अध्यात्म आत्मज्ञाने नित्याः परिनिष्ठिताः । विशेषेण निवृत्तः कामो येभ्यस्ते । सुखदुःख-हेतुत्वात् सुखदुःखसंज्ञानि शीतोष्णादीनि द्वन्द्वानि । तैर्विमुक्ताः । अतएवामूढा निवृताविद्याः सन्तः । तद् अव्ययं पदं गच्छन्ति ॥ ५ ॥

**विश्वनाथः** तद्भक्तौ सत्यां जनाः कीदृशा भूत्वा तं पदं प्राप्नुवन्तीत्यपेक्षायाम् आह निर्मानेति । अध्यात्मनित्या अध्यात्मविचारो नित्य्नित्यकर्तव्यो येषां ते पर-मात्मालोचनतत्पराः ॥ ५ ॥

**बलदेवः** तत्प्रपत्तौ सत्यां कीदृशाः सन्तस् तत् पदं प्राप्नुवन्तीत्याह निर्मानेति । मानः सत्कारजन्यो गर्वः । मोहो मिथ्याभिनिवेशस्ताभ्यां निर्गताः । जि-तः सङ्गदोषः प्रियभार्यादिस्नेहलक्षणो यैस्ते । अध्यात्मं स्वपरात्मविषयको विमर्शः स नित्यो नित्यकर्तव्यो येषां ते । सुखादिहेतुत्वात् तत्संज्ञैर्द्वन्द्वैः शीतोष्णादिभिर् विमुक्तास्तत्सहिष्णवः । अमूढाः प्रपत्तिविधिज्ञाः ॥ ५ ॥

**न तद्भासयते सूर्यो न शशाङ्को न पावकः ।**

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ ६ ॥

**श्रीधरः** तद् एव गन्तव्यं पदं विशिनष्टि न तद् इति । तत् पदं सूर्यादयो न प्रकाशयन्ति । यत् प्राप्य न निवर्तन्ते योगिनः । तद् धाम स्वरूपं परमं मम । अनेन सूर्यादिप्रकाशविषयत्वेन जडत्वशीतोष्णादिदोषप्रसङ्गो निरस्तः ॥ ६ ॥

**विश्वनाथः** तत् पदम् एव कीदृशम् इत्यपेक्षायाम् आह न तद् इति । औष्ण्य-शैत्यादिदुःखरहितं तत् स्वप्रकाशम् इति भावः । तन् मम परमं धाम सर्वोत्कृष्टम् अजडम् अतीन्द्रियं तेजः सर्वप्रकाशकम् । यद् उक्तं हरिवंशे

तत् परं परमं ब्रह्म सर्वं विभजते जगत् ।
ममैव तद् घनं तेजो ज्ञातुम् अर्हसि भारत ॥ इति ।

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयम् अग्निः ।
तम् एव भान्तम् अनुभाति सर्वं
तस्य भासा सर्वम् इदं विभाति ॥ इति (कठ उ. २.२.१५)

श्रुतिभ्यश्च ॥ ६ ॥

**बलदेवः** गन्तव्यं पदं विशिष्यन् परिचाययति न तद् इति । प्रपन्ना यद् गत्वा यतो न निवर्तन्ते । तन् ममैव धाम स्वरूपं परमं श्रीमत् । सर्वावभासका अपि सूर्यादयस्तन् न भासयन्ति प्रकाशयन्ति । न तत्र सूर्यो भाति इत्यादिश्रुतेश्च । सूर्यादिभिरप्रकाश्यस्तेषां प्रकाशकः स्वप्रकाशकचिद्विग्रहो लक्ष्मीपतिरहम् एव पदशब्दबोध्यः प्रपन्नैर्लभ्य इत्यर्थः ॥ ६ ॥

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥

**श्रीधरः** ननु च त्वदीयं धाम प्राप्ताः सन्तो यदि न निवर्तन्ते तर्हि सति सम्पद्य न विदुः सति सम्पद्यामहे इतियादि श्रुतेः सुषुप्तिप्रलयसमये तत्त्वप्राप्तिः सर्वेषाम् अस्तीति को नाम संसारी स्याद् इत्याशङ्क्य संसारिणं दर्शयति ममैवेति पञ्चभिः । ममैवांशो योऽयम् अविद्यया जीवभूतः सनातनः सर्वदा संसारित्वेन प्रसिद्धः । असौ सुषुप्तिप्रलययोः प्रकृतौ लीनतया स्थितानि मनः षष्ठं येषां तानीन्द्रियाणि पुनर्जीवलोके संसारोपभोगार्थम् आकर्षति । एतच् च कर्मेन्द्रियाणां प्राणस्य चोपलक्षणार्थम् ।

अयं भावः सात्यं सुषुप्तिप्रलययोरपि मदंशत्वात् सर्वसापि जीवमात्रस्य मयि लयाद् अस्त्येव मत्प्राप्तिः ।तथाप्यविद्यायावृतस्य सानुशयस्य सप्रकृतिके मयि लयः ।न तु शुद्धे ।तद् उक्तम् अव्यक्ताद् व्यक्तयः सर्वे प्रभन्तीत्यादिना ।अतश्च पुनः संसाराय निर्गच्छन् अविद्वान् प्रकृतौ लीनतया स्थितानि स्वोपाधिभूतानीन्द्रियाणि आकर्षति ।विदुषां तु शुद्धस्वरूपप्राप्तेर्नावृत्तिरिति ॥ ७ ॥

**विश्वनाथ**: त्वद्भक्त्या संसारम् अतिक्राम्यन् तपदगामी जीवः क इत्यपेक्षायाम् आह ममैवांश इति ।यद् उक्तं वाराहे स्वांशश्चाथ विभिन्नांश इति द्वेधायम् इष्यते । विभिन्नांशस्तु जीवः स्यात् इति । सनातनो नित्यः स च बद्धदशायां मनः एव षष्ठं येषां तानीन्द्रियाणि प्रकृतावुपाधौ स्थितानि कर्षति । ममैव एतानीति स्वीयत्वाभिमानेन गृहीतां पादार्गलशृङ्खलाम् इव कर्षति ॥ ७ ॥

**बलदेव**: ननु त्वत्प्रपत्त्या यस्तत्पदं याति, स जीवः क इत्यपेक्षायाम् आह ममैवेति ।जीवः सर्वेश्वरस्य ममैवांशो, न तु ब्रह्मरुद्रादेरीश्वरस्य, स च सनातनो नित्यो, न तु घटाकाशादिवत् कल्पितः ।स च जीवलोके प्रपञ्चे स्थितो मनःष-ष्ठानीन्द्रियाणि श्रोत्रादीनि कर्षति पादादिशृङ्खला इव वहति ।तानि कीदृंशीत्याह प्रकृतिस्थानि प्रकृतिविआरभूताहङ्कारकार्याणीत्यर्थः ।तत्र मनः सात्त्विकाहङ्कारस्य श्रोत्रादिकं तु राजसाहङ्कारस्य कार्यम् इति बोध्यम् ।भगवत्प्रपत्त्या प्राकृतकरण-हीनो भगवल्लोकं गतस्तु भाअगवतैर् देहकरणैर्विभूषणैरिव विशिष्टो भगवन्तं संश्रयन् निवसतीति सूच्यते स वा एष ब्रह्मनिष्ठ इदं शरीरं मर्त्यम् अतिसृज्य ब्रह्माभिसम्पद्य ब्रह्मणा पश्यति ब्रह्मणा शृणोति ब्रह्मणैवेदं सर्वम् अनुभवति इति माध्यन्दिनायन-श्रुतेः । वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठमूर्तयः । इत्यादि स्मृतेश्च ।भगवत्स-ङ्कल्पसिद्धचिद्विग्रहस्तत्र भवतीति । यत् तु घटाकाशवज् जलाकाशवद् वा जीवे ब्रह्मणोऽंशोऽन्तःकरणेन्वच्छेदात् तस्मिन् प्रतिबिम्बनाशाद् वा घटजलनाशे तत्तदा-काशस्य शुद्धाकाशत्ववद् अन्तःकरणनाशे जीवांशस्य शुद्धब्रह्मत्वम् इति वदन्ति, न तत् सारम् जीवभूतः ममांशः सनातन्ः इत्युक्तिव्य्ताकोपात् । परिच्छेदादिवादद्व-यस्य देहिनोऽस्मिन् यथा इत्यत्र प्रत्याख्यानाच् च ।प्रतिबिम्बसादृश्यात् तु तत्त्वं मन्तव्यम् अम्बुवद् अधिकरणविनिर्णयात् । तस्मात् ब्रह्मोपसर्जनत्वं जीवस्य ब्र-ह्मांशत्वं विधुमण्डलस्य शतांशः शुक्रमण्डलम् इत्यादौ दृष्टं चेदम् एकवस्त्वेकदेशत्वं चांशत्वम् आहुः ।ब्रह्म खलु शक्तिमद् एकं वस्तु ब्रह्मशक्तिः इतस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूताम् इति पूर्वोतेरतस्तद् एकदेशात् तदंशो जीवः ॥ ७ ॥

> शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
> गृहीत्वैतानि संयाति वायुर्गन्धान् इवाशयात् ॥ ८ ॥

**श्रीधर**: तान्याकृष्य किं करोतीति ।अत्राह शरीरम् इति ।यद् यदा शरी-

रान्तरं कर्मवशाद् अवाप्नोति यतश्च शरीराद् उत्क्रामतीश्वरो देहादीनां स्वामी तदा पूर्वस्मात् शरीराद् एतानि गृहीत्वा तच्छरीरान्तरं सम्यग् याति । शरीरे सत्यपि इन्द्रियग्रहणे दृष्टान्तः । आशयात् स्वस्थानात् कुसुमादेः सकाशात् गन्धान् गन्धवतः सूक्ष्मान् अंशान् गृहीत्वा वायुर्यथा गच्छति तद्वत् ॥ ८ ॥

**विश्वनाथ**ः तान्यकृष्य किं करोतीत्यपेक्षायाम् आह शरीरम् इति । यत् स्थूलशरीरं कर्मवशाद् अवाप्नोति, यच् च यस्माच् च शरीराद् उत्क्रामति निष्क्रामति, ईश्वरो देहेन्द्रियादिस्वामी जीवः तस्मात् तत्र एतानीन्द्रियाणि भूतसूक्ष्मैः सह गृहीत्वैव संयाति वायुर् गन्धानि इवेति वायुर्यथाशयाद् गन्धाश्रयात् स्रक्चन्दनादेः सकाशात् सूक्ष्मावयवैः सह गन्धान् गृहीत्वान्यत्र याति तद्वद् इत्यर्थः ॥ ८ ॥

**बलदेव**ः जीवलोके स्थित इन्द्रियाणि कर्षति इत्युक्तम् । तत् प्रतिपादयति शरीरम् इति । ईश्वरः शरीरेन्द्रियाणं स्वामी जीवो यद् यदा पूर्वशरीराद् अन्यच् छरीरम् अवाप्नोति, यदा चास्माच् छरीराद् उत्क्रामति, तदैतानीन्द्रियाणि भूतसूक्ष्मैः सह गृह्टिवा यात्याशयात् पुष्पकोशाद् गन्धान् गृहीत्वा वायुरिव स यथान्यत्र याति तद्वत् ॥ ८ ॥

**श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणम् एव च ।**
**अधिष्ठाय मनश्चायं विषयान् उपसेवते ॥ ९ ॥**

**श्रीधर**ः तान्येवेन्द्रियाणि दर्शयन् यद् अर्थं गृहीत्वा गच्छति तद् आह श्रोत्रम् इति । श्रोत्रादीनि बाह्येन्द्रियाणि मनश्चान्तःकरणं, तान्यधिष्टायाश्रित्य शब्दादीन् विषयान् अयं जीव उपभुङ्क्ते ॥ ९ ॥

**विश्वनाथ**ः तत्र गत्वा किं करोतीत्यत आह श्रोत्रम् इति । श्रोत्रादीनीन्द्रियाणि मनश्चाधिष्ठायाश्रित्य विषयान् शब्दादीन् उपभुङ्क्ते ॥ ९ ॥

**बलदेव**ः तानि गृहीत्वा किम् अर्थं याति । तत्राह श्रोत्रम् इति । श्रोत्रादीनि समनस्कान्यधिष्ठायाश्रित्यायं जीवो विषयान् शब्दादीन् उपभुङ्क्ते । तद् अर्थं तद्ग्रहणम् इत्यर्थः । चशब्दात् कर्मेन्द्रियाणि च पञ्च प्राणांश्चाधिष्ठाएत्यवगम्यम् ॥ ९ ॥

**उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।**
**विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १० ॥**

**श्रीधरः** ननु कार्यकारणसङ्घातव्यतिरेकेण एवम्भूतम् आत्मानं सर्वेऽपि किं न पश्यन्ति ।तत्राह उत्क्रामन्तम् इति ।उत्क्रामन्तं देहाद् देहान्तरं गच्छन्तं तस्मिन्न् एव देहे स्थितं वा विषयान् भुञ्जानं वा गुणान्वितम् इन्द्रियादियुक्तं जीवं विमूढा नानुपश्यन्ति नालोकयन्ति ।ज्ञानम् एव चक्षुर्येषां ते विवेकिनः पश्यन्ति ॥१० ॥

**विश्वनाथः** ननु यमाद् देहान् निष्क्रामति यस्मिन् देहे वा तिष्ठति तत्र स्थित्वा वा यथा भोगान् भुङ्क्ते इत्येवं विशेषं नोपलभामहे ।तत्राह उत्क्रामन्तं देहान्न् निष्क्रामन्तं, स्थितं देहान्तरे वर्तमानं च विषयान् भुञ्जानं च गुणान्वितम् इन्दिर्यादिसहितं विमूढा अविवेकिनः ज्ञानचक्षुषो विवेकिनः ॥१० ॥

**बलदेवः** एवं शरीरस्थत्वेनानुभवयोग्यम् अविवेकिनस्तम् आत्मानं नानुभवन्तीत्याह उद् इति ।शरीराद् उत्क्रामन्तं तत्रैव स्थितं वा स्थित्वा विषयान् भुञ्जानं वा गुणान्वितं सुखदुःखमोहैरिन्दिर्यादिभिर्वान्वितं युक्तम् अनुभवयोग्यम् अप्यात्मानं विमूढाश्चिरन्तनज्ञानचक्षुषो विवेकज्ञाननेत्रास्तु तं पश्यन्ति । शरीरादिविविक्तम् अनुभवन्ति ॥१० ॥

**यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।**
**यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११ ॥**

**श्रीधरः** दुर्ज्ञेयश्चायं यतो विवेकिष्वपि केचित् पश्यन्ति केचिन् न पश्यन्तीत्याह यतन्त इति । यतन्तो ध्यानादिभिः प्रयतमाना योगिनः केचिद् एनम् आत्मानम् आत्मनि देहेऽवस्थितं विविक्तं पश्यन्ति ।शास्त्राभ्यासादिभिः प्रयत्नं कुर्वाणा अप्यकृतात्मानोऽविशुद्धचित्ता अत एवाचेतसो मन्दमतय एनं न पश्यन्ति ॥११ ॥

**विश्वनाथः** ते च विवेकिनो यतमाना योगिन एवेत्याह यतन्त इति । अकृतात्मानोऽशुद्धचित्ताः ॥११ ॥

**बलदेवः** ज्ञानचक्षुषः पश्यन्ति इत्येतद् विवृण्वन् दुर्ज्ञानतां तस्याह यतन्त इति ।केचिद् योगिनो यतमानाः श्रवणाद्युपायान् अनुतिष्ठन्त आत्मनि शरीरेऽवस्थितम् एनम् आत्मानं पश्यन्ति ।केचिद् यतमाना अप्यकृतात्मानोऽनिर्मलचित्ता अतोऽवचेतसोऽनुदितविवेकज्ञाना एनं न पश्यन्तीति दुर्ज्ञेयम् आत्मतत्त्वम् इत्यर्थः ॥ ११ ॥

**यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।**
**यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम् ॥१२ ॥**

**श्रीधर**: तद् एवं न तद् भासयते सूर्य इत्यादिना पारमेश्वरं परं धामोक्तम् । तत्प्राप्तानां चापुनरावृत्तिर् उक्ता । तत्र च संसारिणोऽभावम् आशङ्क्य संसारिस्वरूपं देहादिव्यतिरिक्तं दर्शितम् । इदानीं तद् एव पारमेश्वरं रूपम् अनन्तशक्तित्वेन निरूपयति यद् इत्यादिचतुर्भिः । आदियादिषु स्थितं यद् अनेकप्रकारं तेजो विश्वं प्रकाशयति तत् सर्वं तेजो मदीयम् एव जानीहि ॥ १२ ॥

**विश्वनाथ**: तद् एवं जीवस्य बद्धावस्थायां यत् यत् प्राप्यवस्तु तत्राहम् एव सूर्यचन्द्राद्यात्मकः सन्न् उपकरोमीत्याह यद् इति त्रिभिः । आदित्यस्थितं तेज एव उदयपर्वते प्रातरुदित्य जीवस्य दृष्टादृष्टभोगसाधनकर्मप्रवर्तनार्थं जगद् भासयत एवं च यच् चन्द्रमसि अगनौ च तत् तद् अखिलं मामकम् एव । सूर्यादिसंज्ञोऽहम् एव भवामीत्यर्थः । तत् तेजस एव तत्तद्विभूतिरिति भावः ॥ १२ ॥

**बलदेव**: अथ मदंशस्य जीवस्य संसाररक्तस्य मुमुक्षोश्च भोगमोक्षसाधनम् अहम् एवेति भावेनाह यद् इति चतुर्भिः । आदित्ये स्थितं यत् तेजो यच् चन्द्रेऽग्नौ च स्थितं सत् सर्वं जगत् प्रकाशयति, तत् तेजो मामकं मदीयं विद्धि । उदितेन सूर्येण ज्वलितेन च वह्निनादृष्टभोगसाधनानि कर्माणि निष्पद्यन्ते । तिमिरजाड्यनाशादयश्च सुखहेतवो भवन्ति । उदितेन चन्द्रेण चौषधिपोषतापशान्तिज्योत्स्नाविहारास्तथाभूता भवन्तीति तेषां तत्तत्साधकं तेजो मत्तेजोविभूतिरित्यर्थः ॥ १२ ॥

> गाम् आविश्य च भूतानि धारयाम्यहम् ओजसा ।
> पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥

**श्रीधर**: किं च गाम् इति । गां पृथ्वीम् ओजसा बलेनाधिष्ठायाहम् एव चराचराणि भूतानि धारयामि । अहम् एव रसमयः सोमो भूत्वा व्रीह्याद्यौषधीः सर्वाः संवर्धयामि ॥ १३ ॥

**विश्वनाथ**: गां पृथ्वीम् ओजसा स्वशक्त्याविश्याधिष्ठायाहम् एव चराचराणि भूतानि धारयामि । तथाहम् एवामृतरसमयः सोमो भूत्वा व्रीह्याद्यौषधीः सर्वाः संवर्धयामि ॥ १३ ॥

**बलदेव**: गाम् इति पांशुमुष्टितुल्यां गां पृथिवीम् ओजसा स्वशक्त्याविश्य दृढीकृत्य भूतानि स्थिरचराणि धारयामि । मन्त्रवर्णश्चैवम् आह येन द्यौर् उग्रा पृथिवी च दृढा इति । अन्यथासौ सिकतामुष्टिवद्विशीर्येण निमज्जेद् वेति भावः । तथाहम् एव रसात्मकः सोमोऽमृतमयश्चन्द्रो भूत्वा सर्वा औषधीर् निखिला व्रीह्याद्याः पुष्णामि । स्वादुविविधरसपूर्णाः करोमि । तथा च भूमिलोके स्थितस्य जीवस्य विविधप्रासादबाटिकातडागादिक्रीडास्थानानि निर्माय नानारसान् भुञ्जानस्य तत्तत्साधनम् अहम् एवेति ॥ १३ ॥

अहं वैश्वानरो भूत्वा प्राणिनां देहम् आश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १४ ॥

**श्रीधर**: किं च अहम् इति । अहम् ईश्वर एव वैश्वानरो जठराग्निर्भूत्वा प्राणिनां देहस्यान्तः प्रविश्य प्रानापानाभ्यां च तदुद्दीपकाभ्यां सहितः प्राणिभिर्भुक्तं भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधम् अन्नं पचामि । तत्र यद् दन्तैर् अवखण्ड्यावखण्ड्य भक्ष्यते पूपादि तद् भक्ष्यम् । यत् तु केवलं जिह्वया विलेड्य निगीर्यते पायसादि तद् भोज्यम् । यज् जिह्वायां निक्षिप्य रसास्वादेन क्रमशो निगीर्यते द्रवीभूतं गुडादि तल् लेह्यम् । यत् तु दंष्ट्रादिभिर्निष्पीड्य सारांशं निगीर्यावशिष्टं त्यज्यत इक्षुदण्डादि तच् चोष्यम् इति चतुर्विधोऽस्य भेदः ॥ १४ ॥

**विश्वनाथ**: वैश्वानरो जठरानलः प्राणापानाभ्यां तद् उद्दीपकाभ्यां सहितश्चतुर्विधं भक्ष्यं भोज्यं लेह्यं चोष्यम् । भक्ष्यं दन्तच्छेद्यं भृष्टचनकादि भोज्यं मोदकादि । लेह्यं गुडादि । चोष्यम् इक्षुदण्डादि ॥ १४ ॥

**बलदेव**: भोग्यानाम् अन्नादीनां पाकहेतुश् चाहम् एवेत्याह अहम् इति । वैश्वानरो जठराग्निस्तच्छरीरको भूत्वा प्राणिनां सर्वेषां देहम् उदरम् आश्रितः प्रानापानाभ्यां तदुद्दीपकाभ्यां समायुक्तश्च सन्न् अहं तैर्भुक्तं चतुर्विधम् अन्नं पचामि पाकं नयामि । श्रुतिश् चैवम् आह अयम् अग्निर्वैश्वानरो योऽयम् अन्तः पुरुषे येनेदं अन्नं पच्यते इत्यादिना । तथा चाहम् एव जाठराग्निशरीरस् तदुपकारीत्येवम् आह सूत्रकारः शब्दादिभ्योऽन्तः प्रतिष्ठानाच् च इत्यादिना । अन्नस्य चातुर्विध्यं च भक्ष्यं भोज्यं लेह्यं चूष्यं चेति भेदात् । दन्तच्छेद्यं चणकपूपादि । भक्ष्यं चर्व्यम् इति चोच्यते । मोदकौदनसूपादि भोज्यं । पायसगुडमध्वादि लेह्यं । पक्वाम्रेक्षुदण्डादि चूष्यं । सोमवैश्वानरयोः स्वाभेदेनोक्तिः स्वव्याप्यत्वाद् इति बोध्यम् ॥ १४ ॥

सर्वस्य चाहं हृदि संनिविष्टो । मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो । वेदान्तकृद् वेदविदेव चाहम् ॥ १५ ॥

**श्रीधर**: किं च सर्वस्य प्रानिजातस्य हृदि सम्यगन्तर्यामिरूपेण प्रविष्टोऽहम् । अतश्च मत्त एव हेतोः प्राणिमात्रस्य पूर्वान्भूतार्थविषया स्मृतिर्भवति । ज्ञानं च विषयेन्द्रियसंयोगजं भवति । आपोहनं च तयोः प्रमोषो भवति । वेदैश्च सर्वैस् तत्तद्देवतादिरूपेणाहम् एव वेद्यः । वेदान्तकृत् तत्सम्प्रदायप्रवर्तकश्च । ज्ञानदो गुरुरहम् इत्यर्थः । वेदविद् एव च वेदार्थविद् अप्यहम् एव ॥ १५ ॥

**विश्वनाथः** यथैव जठरे जठराग्निरहं तथैव सर्वस्य चराचरस्य हृदि सन्निविष्टो बुद्धितत्त्वरूपोऽहम् एव । यतो मत्तो बुद्धितत्त्वाद् एव पूर्वानुभूतार्थविषयानुस्मृतिर्भवति । तथा विषयेन्द्रिययोगजं ज्ञानं च अपोहनं स्मृतिज्ञानयोर् अपगमश्च भवतीति । जीवस्य बन्धावस्थायां स्वस्योपकारकत्वम् उक्त्वा मोक्षावस्थायां यत् प्राप्यं तत्राप्युपकारत्वम् आह वेदैरिति । वेदव्यासद्वारा वेदान्तकृद् अहम् एव यतो वेदविद् वेदार्थतत्त्वज्ञोऽहम् एव मत्तोऽन्यो वेदार्थं न जानातीत्यर्थः ॥ १५ ॥

**बलदेवः** प्राणिनां ज्ञानाज्ञानहेतुश्चाहम् एवेत्याह सर्वस्य चेति । तयोः सोमवैश्वानरयोः सर्वस्य च प्राणिवृन्दस्य हृदि निखिलप्रवृत्तिहेतुज्ञानोदयदेहेऽहम् एव नियामकत्वेन सन्निविष्टः । अन्तःप्रविष्टः शास्ता जनानाम् इत्यादिश्रवणात् (चित्त्यु. ११.२, तै. आ. ३.११, रामानुज) । अतो मत्त एव सर्वस्य स्मृतिः पूऋवानुभूतवस्तुविषयानुसन्धिज्ञानं च विषयेन्द्रियसन्निकर्षजन्यं जायते । तयोरपोहनं प्रमोषश्च मत्तो भवति । एवम् उक्तं उद्धवेन त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तत्र शक्तितः इति ।

एवं सांसारिकभोगसाधनतां स्वस्योक्त्वा मोक्षसाधनताम् आह वेदैश्चेति । सर्वैर्निखिलैर्वेदैरहम् एव सर्वेश्वरः सर्वशक्तिमान् कृष्णो वेद्यः । योऽसौ सर्वैर्वेदैर्गीयते इति श्रुतेः । अत्र कर्मकाण्डेन परम्परया ज्ञानकाण्डेन तु साक्षाद् इति बोध्यम् । कथम् एवं प्रत्येतव्यम् इति चेत् तत्राह वेदान्तकृद् अहम् एवेति । वेदानाम् अन्तोऽर्थनिर्णयस्तत्कृद् अहम् एव बादरायणात्मना । एवम् आह सूत्रकारः त तु समन्वयात् इत्यादिभिः । नन्वन्ये वेदार्थम् अन्यथा व्याचक्ष्यते । तत्राह वेदविद् एव चाहम् इत्यहम् एव वेदविद् इति । बादरायणः सन यम् अर्थम् अहं निरणैषं स एव वेदार्थस्ततोऽन्यथा तु भ्रान्तिविजृम्भित इति । तथा च मोक्षप्रदस्य सर्वेश्वरतत्त्वस्य वेदैरबोधनाद् अहम् एव मोक्षसाधनम् ॥ १५ ॥

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥**

**श्रीधरः** इदानीं तद् धाम परमं ममेति यद् उक्तं स्वकीयं सर्वोत्तमस्वरूपं तद् दर्शयति द्वाविति त्रिभिः । क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ । तावेवाह तत्र क्षरः पुरुषो नाम सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि । अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः । कुटो राशिः शिलाराशिः । पर्वत इव देहेषु नश्यत्स्वपि निर्विकारतया तिष्ठतीति कूटस्हतश्चेतनो भोक्ता । स त्वक्षरः पुरुष इत्युच्यते विवेकिभिः ॥ १६ ॥

**विश्वनाथः** यस्माद् अहम् एव वेदवित् तस्मात् सर्ववेदार्थनिष्कर्षं सङ्क्षेपेण ब्रवीमि शृणु इत्याह द्वाविमाविति त्रिभिः । लोके चतुर्दशभुवनात्मके जडप्रपञ्चे इमौ

द्वौ पुरुषौ चेतनौ स्तः । कौ तावत आह क्षरं स्वस्वरूपात् क्षरति विच्युतो भवतीति क्षरो जीवः । स्वस्वरूपान् न क्षरतीत्यक्षर ब्रह्मैव । एतद् वै तद् अक्षरं गार्गि ब्राह्मणा विविदिषन्ति । इति श्रुतेः । अक्षरं ब्रह्म परमम् इति स्मृतेश्च अक्षरशब्दो ब्रह्मवाचक एव दृष्टः । क्षराक्षरयोरर्थं पुनर्विशदयति सर्वाणि भूतानि एको जीव एव अनाद्यविद्यया स्वरूपविच्युतः सन् कर्मपरतन्त्रः समष्ट्यात्मको ब्रह्मादिस्थावरान्तानि भूतानि भवतीत्यर्थः । जात्या वा एकवचनम् । द्वितीयपुरुषोऽक्षरस्तु कूटस्थ एकेनैव स्वरूपेणविच्युतिमता सर्वकालव्यापी । एकरूपतया तु यः कालव्यापी स कूटस्थः इत्यमरः ॥ १६ ॥

**बलदेव**: बादरायणात्मना निर्णीतं वेदार्थं सङ्क्षिप्याह द्वाविति । लोक्यते तत्त्वम् अनेन इति व्युत्पत्तेर्लोके वेदे । द्वौ पुरुषौ प्रथितौ इमाविति प्रमाणसिद्धता सूच्यते । तौ कावित्याह क्षरश्चेति । शरीरक्षरणात् क्षरोऽनेकावस्थो बद्धोऽचित्संसर्गैकधर्मसम्बन्धाद् एकत्वेन निर्दिष्टः । अक्षरस्तदभावाद् एकावस्थो मुक्तोऽचिद्वियोगैकधर्मसम्बन्धाद् एकत्वेन निर्दिष्टः । क्षराक्षरौ स्फुटयति सर्वाणि ब्रह्मादिस्तम्बान्तानि भूतानि क्षरः । कूतस्थः सदिअकावस्थो मुक्तस्त्वक्षरः । एकत्वनिर्देशः प्रागुक्तयुक्तेर्बोध्यः । बहवो ज्ञानतपसा इत्यादेः । इदं ज्ञानम् उपाश्रित्य इत्यादेश् च बहुत्वसङ्ख्याकः सः ॥ १६ ॥

## उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
## यो लोकत्रयम् आविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

**श्रीधर**: यद् अर्थम् एतौ लक्षितौ तम् आह उत्तम इति । एताभ्यां क्षराक्सराभ्याम् अन्यो विलक्षणस्तु उत्तमः पुरुषः । वैलक्षण्यम् एवाह परमश्चासावात्मा चेत्युदाहृतः उक्तः श्रुतिभिः । आत्मत्वेन क्षराद् अचेतनाद् विलक्षणः । परमत्वेनाक्षराच् चेतनाद् भोक्तुर्विलक्षण इत्यर्थः । परमात्मत्वं दर्शयति यो लोकत्रयम् इति । य ईश्वर ईशनशीलोऽव्ययश्च निर्विकार एव सन् लोकत्रयं कृत्स्नम् आविश्य बिभर्ति पालयति ॥ १७ ॥

**विश्वनाथ**: ज्ञानिभिरुपास्यं ब्रह्मोक्त्वा योगिभिरुपास्यं परमात्मानम् आह उत्तम इति । तुशब्दः पूर्ववैशिष्ट्याद् द्योतकः । ज्ञानिभ्यश्चाधिको योगीत्युपासकवैशिष्ट्याद् एवोपास्यवैशिष्ट्यं च लभ्यते । परमात्मतत्त्वम् एव दर्शयति य ईश्वर ईसनशीलोऽव्ययो निर्विकार एव सन् लोकत्रयं कृत्स्नम् आविश्य बिभर्ति धारयति पालयति च ॥ १७ ॥

**बलदेव**: यद् अर्थं द्वौ पुरुषौ निरूपितौ तम् आह उत्तम इति । अन्यः क्षराक्षराभ्यां न तु तयोरेवैकः सङ्कल्प इति भावः । तत्र श्रुतिसम्मतिम् आह परमात्मेति । उत्तमताप्रयोजकं धर्मम् आह यो लोकेति । न चैतज् जगद्विधारणपालनरूपम् ईशनं

बद्धस्य जीवस्य कर्मासम्भवात् । न च मुक्तस्य जगद्व्यापारवर्जम् इति प्रतिषेधाच् च ॥ १७ ॥

> यस्मात् क्षरम् अतीतोऽहम् अक्षरादपि चोत्तमः ।
> अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥

**विश्वनाथ**: योगिभिरुपास्यं परमात्मानम् उक्त्वा भक्तैरुपास्यं भगवन्तं वदन् भगवत्त्वेऽपि स्वस्य कृष्णस्वरूपस्य पुरुषोत्तम इति नाम व्याचक्षाणः सर्वोत्कर्षम् आह यस्माद् इति । क्षरं पुरुषं जीवात्मानम् अतीतः अक्षरात् पुरुषात् ब्रह्मत उत्तमाद् अविकारात् परमात्मनः पुरुषाद् अप्युत्तमः ।

> योगिनाम् अपि सर्वेषां
> मद्गतेनान्तरात्मना ।
> श्रद्धावान् भजते यो मां
> स मे युक्ततमो मतः ॥ इति (गीता ६.४७)

उपासकवैशिष्ट्याद् एवोपास्यवैशिष्ट्यलाभात् । चकाराद् भगवतो वैकुण्ठनाथादेः सकाशाद् अपि एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् इति सूतोक्तेरहमुत्तमः ।

अत्र यद्यप्येकम् एव सच्चिदानन्दस्वरूपं वस्तु ब्रह्मपरमात्मभगवत्शब्दैरुच्यते न तु वस्तुतः स्वरूपतः कोऽपि भेदोऽस्ति स्वरूपद्वयाभावात् (भाग्. ६.९.३५) इति षष्ठस्कन्धोक्तेः । तद् अपि तत्तदुपासकानां साधनतः फलतश्च भेददर्शनात् भेद इव व्यवह्रियते । तथा हि ब्रह्मपरमात्मभगवदुपासकानां क्रमेण तत्तत्प्राप्तिसाधनं ज्ञानं योगो भक्तिश्च । फलं च ज्ञानयोगयोर्वस्तुतो मोक्ष एव, भक्तेस्तु प्रेमवत्पार्षदत्वं च । तत्र भक्त्या विना ज्ञानयोगाभ्यां नैष्कर्म्यम् अप्यच्युतभाववर्जितं न शोभते (भाग्. १.५.१२) इति । पुरेह भूमन् बहवोऽपि योगिनः [भाग्. १०.१४.५] इत्यादिदर्शनात् न मोक्ष इति ।

ब्रह्मोपासकैः परमात्मोपासकैः स्वसाध्यफलसिद्ध्यर्थं भगवतो भक्तिरवश्यं कर्तव्यैव । भगवदुपासकस्तु स्वसाध्यफलसिद्ध्यर्थं न ब्रह्मोपासनापि परमात्मोपासना क्रियते । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेद् इह [भाग्. ११.२०.३१] इति, यत् कर्मभिर्यत् तपसा ज्ञानवैराग्यतश्च यदित्यादौ [भाग्. ११.२०.३२]

> सर्वं मद्भक्तियोगेन

मद्भक्तो लभतेऽञ्जसा ।
स्वर्गापवर्गं मद्धाम
कथञ्चिद् यदि वाञ्छति ॥ इति (भाग्. ११.२०.३३) ।

या वै साधनसम्पत्तिः
पुरुषार्थचतुष्टये ।
तया विना तद् आप्नोति
नरो नारायणाश्रयः ॥ इत्यादि वचनेभ्यः ॥

अतएव भगवदुपासनया स्वर्गापवर्गप्रेमादीनि सर्वफलान्येव लब्धुं शक्यन्ते । ब्रह्मपरमात्मोपासनया तु न प्रेमादीनीत्यत एव ब्रह्मपरमात्माभ्यां भगवदुत्कर्षः खलु अभेदेऽप्युच्यते । यथा तेजस्त्वेनाभेदेऽपि ज्योतिर् दीपाग्निपुञ्जेषु मध्ये शीताद्यार्तिक्षयाद् धेतोरग्निपुञ्ज एव श्रेष्ठ उच्यते । तत्रापि भगवतः श्रीकृष्णस्य तु परम एवोत्कर्षः । यथा अग्निपुञ्जाद् अपि सूर्यस्य, येन ब्रह्मोपासनापरिपाकतो लभ्यो निर्वाणमोक्षः स्वद्वेष्टृभ्योऽप्यघबक्जरासन्धादिभ्यो महापापिभ्यो दत्त इति । अतएव ब्रह्मणो हि प्रतिष्ठाहम् इत्यत्र यथावद् एव व्याख्यातं श्रीस्वामिचरणैः ।

श्रीमधुसूदनसरस्वतीपादैरपि

चिदानन्दाकारं जलदरुचिसारं श्रुतिगिरां
व्रजस्त्रीणां हारं भवजलधिपारं कृतधियाम् ।
विहन्तुं भूभारं विदधदवतारं मुहुरहो
ततो वारं वारं भजत कुशलारम्भकृतिनः ॥ इति ।

वंशीविभूषितकरान् नवनीरदाभात्
पीताम्बराद् अरुणबिम्बफलाधरौष्ठात् ।
पूर्णेन्दुसुन्दरमुखाद् अरविन्दनेत्रात्
कृष्णात् परं किम् अपि तत्त्वम् अहं न जाने ॥ इति ।

प्रमाणतोऽपि निर्णीयं
कृष्णमाहात्म्यम् अद्भुतम् ।
न शक्नुवन्ति ये सोढुं
ते मूढा निरयं गताः ॥

इत्युक्तवद्भिः कृष्णे सर्वोत्कर्ष एव व्यवस्थापित इत्यतः द्वाविमौ इत्यादि श्लोकत्रयस्यास्य व्व्ख्यायाम् अस्याम् अभ्यसूया नाविष्कर्तव्या । नमोऽस्तु केवलविद्भ्यः ॥ १८ ॥

**बलदेव**ः अथ पुरुषोत्तमनामनिर्वचनं स्वस्य तत्त्वम् आह यस्माद् इति उत्तम उत्कृष्टतमः । लोके पौरुषेयागमे लोक्यते वेदार्थोऽनेन इति निरुक्तेः । वेदे तावद् एष सम्प्रसादोऽस्माच् छरीरात् समुत्थाय परं ज्योतीरूपं सम्पद्य स्वेन रूपेणाभि-निष्पद्यते, स उत्तमः पुरुषः इत्यादौ प्रथितः यत् परं ज्योतिः सम्प्रसादेनोपसम्पन्नं स उत्तमः पुरुषः परमात्मेतियर्थः । लोके च

तैर्विज्ञापितकार्यस्तु
भगवान् पुरुषोत्तमः ।
अवतीर्णो महायोगी
सत्यवत्यां पराशरात् ॥

इत्यादौ प्रथितः ॥ १८ ॥

## यो माम् एवम् असंमूढो जानाति पुरुषोत्तमम् ।
## स सर्वविद्भजति मां सर्वभावेन भारत ॥ १९ ॥

**श्रीधर**ः एवम्भूतेश्वरस्य ज्ञातुः फलम् आह य इति । एवम् उक्तप्रकारेणासम्मूढो निश्चितमतिः सन् यो मां पुरुषोत्तमं जानाति स सर्वभावेन सर्वप्रकारेण माम् एव भजति । ततश्च सर्ववित् सर्वज्ञो भवति ॥ १९ ॥

**विश्वनाथ**ः नन्वेतस्मिंस्त्वया व्यवस्थापितेऽप्यर्थे वादिनो विवदन्त एव, तत्र विवदन्तां ते मन्मायामोहिताः साधुस्तु न मुह्यतीत्याह यो माम् इति । असम्मूढो वादिनां वादिअरप्राप्तसंमोहः । स एव सर्वविद् अनधीतशास्त्रेऽपि स सर्वशास्त्रार्थ-तत्त्वज्ञः । तदन्यः किलाधीताध्याशितसर्वशास्त्रेऽपि संमूढः सम्यङ्मूर्ख एवेति भावः । तथा य एवं जानाति स एव मां सर्वतोभावेन भजति । तद् अन्ये भजन्न् अपि न मां भजतीत्यर्थः ॥ १९ ॥

**बलदेव**ः तात्पर्यद्योतनाय पुरुषोत्तमत्ववेत्तुः फलम् आह यो माम् इति । एवं मदुक्तनिरुक्त्या न त्वश्वकर्णादिवत् संज्ञामात्रत्वेन । यो मां पुरुषोत्तमं जानात्यसंमूढः । प्रोक्ते पुरुषोत्तमत्वे संशयशून्यः सन्, स श्लोकत्रयस्यैवार्थं जानन् सर्ववित् । निखिल-स्य वेदस्य तत्रैव तात्पर्यात् । पुरुषोत्तमत्वज्ञो मां सर्वभावेन सर्वप्रकारेण भजत्युपास्ते । सर्ववेदार्थवेत्तरि सर्वभक्त्यङ्गानुष्ठातरि च यो मे प्रसादः स तस्मिन् भवेद् इति मे पुरुषोत्तमत्वे सन्दिहानस्त्वधीतसर्ववेदोऽप्यज्ञः । सर्वथा भजन्न् अप्यभक्त इति भावः ॥ १९ ॥

इति गुह्यतमं शास्त्रम् इदम् उक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ॥ २० ॥

**श्रीधरः** अध्यायार्थम् उपसंहरति इतीति । इत्यनेन संक्षेपप्रकारेण गुह्यतमम् अतिरहस्यं सम्पूर्णं शास्त्रम् एव मयोक्तम् । न तु पुनर्विंशतिश्लोकम् अध्यायमात्रं हे अनघ व्यसनशून्य । अत एतन् मदुक्तं शास्त्रं बुद्ध्वा बुद्धिमान् सम्यग् ज्ञानी स्याअत् । ऋतकृत्यश्च स्यात् । योऽपि कोऽपि हे भारत त्वं कृतकृत्योऽसीति किं वक्तव्यम् इति भावः ॥

संसारशाखिनं छित्त्वा
स्पष्टं पञ्चदशे विभुः ।
पुरुषोत्तमयोगाख्ये
परं पदम् उपादिशत् ॥

इति श्रीश्रीधरस्वामिकृतायां भगवद्गीता=टीकायां सुबोधिन्यां पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥

**विश्वनाथः** अध्यायार्थम् उपसंहरति इतीति । विंशत्या श्लोकैरेभिरतिरहस्यं शास्त्रम् एव सम्पूर्णं मयोक्तम् ।

जडचैतन्यवर्गाणां
विवृतं कुर्वता कृतम् ।
कृष्ण एव महोत्कर्ष
इत्यध्यायार्थ ईरितः ॥

इति सारार्थवर्षिण्यां
हर्षिण्यां भक्तचेतसाम् ।
गीतास्वयं पञ्चदशः
सङ्गतः सङ्गतः सताम् ॥

**बलदेवः** अथैतद् अपात्रेष्वप्रकाश्यम् इति भावेनाह इतीति । इत्येवं संक्षेपरूपं पुरुषोत्तमत्वनिरूपकम् इदं त्रिश्लोकीशास्त्रं तुभ्यं परमभक्ताय मयोक्तम् । हे अनघ, त्वाअप्यपात्रेषु नैतत् प्रकाश्यम् इति भावः । एतद् बुद्ध्वा बुद्धिमान् परोक्षज्ञानी स्यात् । कृतकृत्योऽपरोक्षज्ञानी चेति पुरुषोत्तमत्वज्ञानम् अभ्यर्च्यते ॥

बद्धान् मुक्ताच् च यः पुंसो
भिन्नस्तद्भृत् तदुत्तमः ।
स पुमान् हरिरेवेति
प्राप्तं पञ्चदशाद् अतः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये पञ्चदशोऽध्यायः ॥१४ ॥